Here in the illustrative word हिअडउं य has been elided as per sūtra किसलय etc.[1]

1 ' किसलय – कालायस – हृदये यः । ', *Sidha Hemacandra* VIII. I. 269.

(Illustration of) डित् उल्लअ :
'चूडुल्लउ चुण्णी होइसइ'।
(= चूडकः चूर्णीभविष्यति।) (Vide : sūtra 395. 2)

(1) (Illustration of) डुल्लडः (= डित् उल्ल + डित् अड) :
स्वामिप्रसादं सलज्जं प्रियं, सीमासन्धौ वासम्।
प्रेक्ष्य (च) बाहुबलं, धन्या (= प्रिया) मुञ्चति निःश्वासम्॥

"(Seeing) the king's favour, shyness of the husband (his) posting (lit. 'residence') on the frontiers, and his (remarkable) valour—the (young) wife heaves deep sighs."

The underlying idea is this :

The king has given an important military assignment to the husband, on the borders of the kingdom, which is always simmering with trouble, and the husband is so recklessly brave that he will always rush into the fray. He is so shy that he would not tell his master that he is newly wed and his wife is pining away, so that his posting may be made nearer home. All these factors point to an ever present danger, which makes the newly-wed maiden ever anxious about her husband's life.

In the above illustrative verse, बलुल्लडा is an instance of the combination of all the three suffixes उल्ल, अड and अ, while the final lengthening of the vowel (अ > आ) is according to the sūtra 'स्यादौ दीर्घह्रस्वौ'। (sūtra 330).

431. (पूर्वोक्तप्रत्ययान्तानां शब्दानां) स्त्रीलिङ्गे डित् – ई (प्रत्ययः भवति)।

In Apabhraṁśa, words taking the suffixes mentioned in the foregoing two sūtras, when in Feminine (gender), take डित् ई termination.

(1) 'पथिक दृष्टा गौरी' ? 'दृष्टा मार्गं अवलोकयन्ती।
अश्रूच्छ्वासैः कञ्चुकं तिमितोद्वानं (= आर्द्रशुष्कं) कुर्वती॥

"'O sojourner ! did you see my (fair) lady-love ?' '(Yes), I saw her, listlessly looking at your route (of return), and making her bodice wet and dry with her tears and deep sighs.'"

Here गोरडी illustrates the sūtra.

(Another illustration):

'एक कुडुल्ली पंचाहि रुद्धी'। (='एका कुटी पञ्चभिः रुद्धा।')

(Vide : sūtra 422.12)

432. पूर्वोक्तप्रत्ययान्वितशब्दस्य अ-अन्तात् (स्त्रीलिङ्गे) डित्-आ (प्रत्ययः भवति)।

In Apabhramśa words (extended as above) with the suffix (e g. अडअ) which terminates in अ, take डित् आ termination in the Feminine gender. This is an exception to the above sūtra about the डित् ई term. in Fem. nouns.

(1) 'प्रियः आगतः' (इति) श्रुता वार्ता, तस्य ध्वनिः च कर्णे प्रविष्टः।
(तदैव) तस्य विरहस्य नश्यतः धूलिः अपि न दृष्टा॥

"I learnt the news that my dear had come (from his long journey): his words (lit. voice) fell on my ears. (That very moment) (the anguish of) separation disappeared (lit. 'fled away') so that no trace (lit. 'no dust of its feet') of it was seen anywhere."

Here धूलडिआ is the illustration of the आ term.

It is formed thus : धूली (=धूलिः) + अडअ > धूल + अडअ > धूलडअ > धूलडआ > धूलडिआ (cf. sūtra 433).

433. 'अ'-स्य इत् (=इ) ए (=आ-प्रत्यये)।

In Apabhramśa in Feminine nouns the (penultimate) अ-कार before the आ suffix, changes to इ. e. g. 'धूलडिआ वि न दिट्ठ।' (='धूलिका अपि न दृष्टा') (Vide : sūtra 432.1)

This change occurs only in Feminine nouns; e. g. in 'झुणि कन्नडइ पइट्ठ।' (='ध्वनिः कर्णे प्रविष्टः।') the change

अ > इ has not taken place in कन्नड्, as it is a Masculine noun.

434. युष्मद् – आदि – (शब्दानां परस्य) ईय – (प्रत्ययस्य) डित् आरः (आदेशः भवति)।

In Apabhraṁśa in युष्मद् and other (such words), the ईय term. (e. g. in युष्मदीय, अस्मदीय etc) takes the ādeśa आर. (i. e. युष्मद् > तुम्ह ; ईय > आर ; युष्मदीय > तुम्हार).

(1) संदेशेन किं त्वदीयेन यत् सगाय न मिल्यते ।
स्वप्नान्तरे पीतेन पानीयेन, प्रिय, पिपासा किं छिद्यते ॥

"What is the use of your message, if we cannot meet together? If in a dream (one feels) one is drinking water, can thirst be ever quenched (by it)?"

Here तुहारेण (= त्वदीयेन) illustrates the sūtra.

Other illustrations :

'देक्खु अम्हारा कंतु'। (= पश्य अस्मदीयं कान्तम्।)

(Vide : sūtra 345.1)

'बहिणि महारा कंतु' (= भगिनि मदीयः कान्तः।)

(Vide : sūtra 351.1)

435. (इदम् – किम् – आदि – सर्वनाम्नाम्) अत् – प्रत्ययस्य डित् एत्तुलः (आदेशः भवति)।

In Apabhraṁśa when the pronouns इदम, किम, यत्, तद्, एतद् take the अत् term., it is substituted by डत् एत्तुल. e. g एत्तुलो (= इयान्); केत्तुलो (= कियान्); जेत्तुले (= यावान्) तेत्तुलो (= तावान्).

436. (सर्वनाम्नाम्) त्र – प्रत्ययस्य डित् एत्तहे (आदेशो भवति).

In Apabhraṁśa when the pronouns (इदम् etc.) have, in the Locative (sense) त्र–term. it is substituted by the ādeśa डित् एत्तहे.

(1) यत्र तत्र द्वारे लक्ष्मीः विसंष्ठुला (= विह्वला) धावति ।
प्रियप्रभ्रष्टा इव गौरी निश्चला कुत्र अपि न तिष्ठति ॥

"Here and there, on to the doorsteps (and in to the homes), Lakṣmī (the goddess of fortune) rushes unsteadily; like a maiden deserted by her lover, she remains steadfast nowhere."

Here एत्तहे (=अत्र), and तेत्तहे (=तत्र) illustrate the sūtra.

437. त्व—तल् (=ता)-प्रत्यययोः प्पण-(आदेशः भवति)।

In Apabhraṁśa the (Taddhita) terminations त्व and ता are substituted by the ādeśa प्पण. e. g.

'वड्डुप्पणु पर पाविअइ।' (=महत्त्वं परं प्राप्यते।)

(Vide: sūtra 366.1)

By the प्रायोऽधिकार (=the proviso that the change mentioned in the sūtra takes place generally, but not always, (the alternative formation will be):

'वड्डत्तणहो तणेण।' (='महत्त्वस्य अर्थे।') (Vide: sūtra 366.1).

438. (कृत्-) तव्य-प्रत्ययस्य 'इएव्वउं'-'एव्वउं'-'एवा' इति (आदेशाः भवन्ति)।

In Apabhraṁśa the Kṛt termination तव्य (of Potential Participles) is substituted by the three ādeśas—इएव्वउं, एव्वउं, एवा. e. g.

(1) एतद् गृहीत्वा यद् मया यदि प्रिय. उद्वार्यते।
मया कर्तव्यं किमपि नापि मर्तव्यं परं दीयते॥

"If accepting this I have to give up (lit. 'sacrifice') my beloved, then nothing remains for me to do but only to die."

Here करिएव्वउं and मरिएव्वउं are illustrations of the इएव्वउं) ādeśa (for तव्य).

(2) देशोच्चाटनं शिखिक्वथनं घनकुट्टनं यद् लोके।
मञ्जिष्ठया अतिरक्तया सर्वं सोढव्यं भवति॥

"What is (the most trying ordeal) in this world—being uprooted from one's soil, being boiled on fires and being pounded by hammers—all this has to be borne

by मञ्जिष्ठा (Mod. Guj. मजीठ—'a deep red vegetable dye'). (for) it is so very रक्त (='red'; पक्षे, 'in love')"

Here सहेव्वउं is the illustration of the एव्वउं ādeśa.

(3) स्वपितव्य परं वारितं पुष्पवतीभि समम् ।
जागर्तव्यं पुन. कः धरति यदि सः वेदः प्रमाणम् ॥

"Sleeping with a woman during her periods is forbidden; but who prevents one for keeping awake with her—if (indeed) the Vedic injunctions must be followed?"

Here सोएवा and जग्गेवा are illustrations of the एवा ādeśa.

439. क्त्वा – (प्रत्यस्य) 'इ' – 'इउ' – 'इवि' – 'अवि' – (आदेशाः भवन्ति) ।

In Apabhramśa the क्त्वा term. (of Absolutive Participles) has four ādeśas इ, इउ, इवि, अवि.

(Illustration) of the इ ādeśa :

(1) हृदय, यदि वैरिण. बहव. ततः किं अभ्रे आरोहामः ।
अस्माक (अपि) द्वौ हस्तौ यदि पुनः मारयित्वा म्रियामहे ॥

"O my heart! if enemies outnumber us many times, do we, therefore, fly to (take shelter in) the sky? We (too) have two hands, if (it comes to that) we will lay down our lives after killing (several enemies in the battle)."

Here मारि (=मारयित्वा) illustrates the sūtra. Dr. Vaidya explains अब्भि as = घना. (='clouds'), which is not quite relevant in this context.

(Illustration) of इउ ādeśa :

'गय – घड – भज्जिउ जंति' ।

(=गजघटाः भज्यन्ते) । (Vide : sūtra 395.5)

(Illustration) of the इवि ādeśa ·

(2) रक्षति सा विषहारिणी (=पानीयहारिका) द्वौ करौ चुम्बित्वा जीवम् ।
प्रतिबिंबितमुञ्जवत् जलं याभ्या अ–क्षोभितं पीतम् ॥

"That water-girl sustains her life by kissing the two hands with which she drank water, in which the image of मुञ्ज (='king Muñja'; पक्षे 'the muñja grass') was reflected undisturbed."

Here चुम्बिवि is the illustration of the इवि ādeśa.

(3) (Illustration) of अवि ādeśa :

बाहु विमोच्य यासि त्वं, भवतु, तथा कः दोषः ।
हृदयस्थितः यदि निःसरसि (ततः) जानामि मुञ्ज (त्वं) सरोषः ॥

"You are thrusting aside my arms (in embrace); (well), be it so, there is no harm (in it). If you, (however), get out of my heart, (then only) (dear) Muñja I will know that you are estranged (lit. 'angry')."

Here विछोडवि illustrates the sūtra.

440. (क्त्वा-प्रत्ययस्य) 'एप्पि'-'एप्पिणु'-'एवि'-'एविणु' - (इति आदेशाः) ।

In Apabhraṁśa (the क्त्वा term. of the Absolutive Participle) is substituted by four ādeśas—'एप्पि', 'एप्पिणु', 'एवि', 'एविणु'. e g.

(1) जित्वा अशेषं कषाय-बलं दत्वा अभयं जगत (=जगते) ।
लात्वा (=गृहीत्वा) महाव्रतानि (मुनयः) शिवं लभन्ते ध्यात्वा
तत्त्वस्य (=तत्त्वम्) ॥

"Having subjugated an entire army of passions, having granted (spiritual) protection to the world, after taking solemn (lit. 'great') vows, and meditating upon the fundamental truth, the sages attain beatitude."

Here जेप्पि, देप्पिणु, लेवि and झाएविणु illustrate the sūtra.

The four terminations are mentioned one by one to indicate the context with the following (sūtra).

441. तुम् (-प्रत्ययस्य) 'एवं'-'अण'-'अणहं'-'अणहिं' च (प्राक्तनसूत्रनिर्दिष्टादेशैः सहिताः) (आदेशाः भवन्ति) ।

In Apabhraṁśa the तुम् termination (of the Infinitive of Purpose) has 4 ādeśas 'एवं', 'अण', 'अणहं', 'अणहिं'; and (also) as च (= 'and') in the sūtra indicates एप्पि, एप्पिणु, एवि, एविणु (i. e. the 4 ādeśas mentioned in the previous sūtra) – thus (in all) 8 ādeśas.

Illustrations :

(1) दातुं दुष्करं निजधनं, कर्तुं न तपः प्रतिभाति ।
एवमेव सुखं भोक्तुं मनः , परं भोक्तुं न याति ॥

"One finds it difficult to donate one's wealth; and it does not strike him that he ought to practise penance. His intention is to enjoy pleasures for nothing; but he can never enjoy them (that way)".

Here देवं, करण, भुंजणहं, भुंजणहिं illustrate the four ādeśas (of तुम्), namely, एवं, अण, अणहं and अणहिं.

(2) जेतुं त्यक्तुं (च) सकलां धरां, लातुं (=गृहीतुं) तपः पालयितुम् (च) ।
विना शान्तिना तीर्थेश्वरेण कः शक्नोति भुवने अपि ॥

"To conquer the whole world and (then) to give it away, to undertake penance and observe it (in its entirety)—except the तीर्थंकर शान्तिनाथ who can achieve this in the whole (wide) world ?"

Here जेप्पि, चएप्पिणु, लेविणु and पालेवि are the illustrations of एप्पि, एप्पिणु, एविणु and एवि ādeśas (of the तुम् termination).

442. गम् – (धातोः) 'एप्पिणु' – 'एप्पि' (– प्रत्यययोः) ए–कारस्य लुक् (=लोपः) वा (भवति) ।

In Apabhraṁśa when applied to the root गम् the two (तुम्–) ādeśas एप्पिणु and एप्पि drop their intia. ए, optionally.

Illustrations :

(1) गत्वा वाराणस्यां नराः अथ उज्जयिन्यां गत्वा ।
मृताः प्राप्नुवन्ति परमपदं दिव्यान्तराणि मा जल्प ॥

"Having gone to Banaras, or having gone to Ujjayinī and meeting death (there), people attain the

highest bliss (lit. 'place')—don't talk of other divine places."

Here गंप्पिणु and गप्पि are illustrations of initial ए of एप्पिणु and एप्पि being dropped.

Alternatively,

(2) गङ्गा गत्वा यः म्रियते यः शिवतीर्थं गत्वा ।
क्रीडति त्रिदशावासगतः सः यमलोकं जित्वा ॥

"He who breathes last on the (banks of the) Ganges or in (lit. 'having gone to') a शिवतीर्थ (='a holy place, sanctified by god Śiva'), conquers the Yama's abode (यमलोक), and enjoys himself in heaven."

Here the usual (untruncated) forms गमेप्पिणु and गमेप्पि are used.

443. तृन् (=तृ) – प्रत्ययस्य अणअ (आदेशः भवति)।

In Apabhraṁśa the तृ termination of (Verbal nouns) is substituted by the अणअ ādeśa. e. g.

(1) हस्ती मारयिता, लोकः कथयिता ।
पटहो वादयिता, श्वा भषिता ॥

"The elephant has the habit of attacking; people have the habit of talking (scandal); the drum has the habit of being beaten; the dog has the habit of barking."

Here मारणउ, बोल्लणउ, वज्जणउ, भसणउ are the illustrations of the sūtra.

444. 'इव'-अर्थे 'नं' – 'नउ' – 'नाइ' – 'नावइ' – 'जणि' – 'जणु' – इति (आदेशाः भवन्ति)।

In Apabhraṁśa to express the sense of 'इव' (= यथा 'like', 'as it') there are 6 ādeśas – namely 'नं', 'नउ', 'नाइ', 'नावइ', 'जणि', and 'जणु'.

(Illustration of) नं :

= 'नं मल्ल – जुज्झु ससि – राहु करहिं'।

(= यथा मल्लयुद्धं शशिराहू कुरुतः ।) (Vide sūtra 382.1)

(Illustration of) नउ :

(1) रव्यस्तमने समाकुलेन कण्ठे वितीर्णः न छिन्नः ।
चक्रेण (= चक्रवाकेन) खण्डः मृणालिकायाः यथा जीवार्गलः दत्तः ॥

" As the Sun was setting the distressed चक्रवाक placed a bit of lotus-fibre in the mouth but did not bite it—as if it had fixed a crow-bar to shut in his (departing) soul."

(Illustration of) नाइ :

(2) वलयावलि-निपतन-भयेन धन्या (= प्रिया) ऊर्ध्वभुजा याति ।
वल्लभ-विरह-महाह्रदस्य स्ताघं गवेषयति इव ॥

" For fear of dropping her row of bracelets the fair lady moves with both hands raised—as if she is sounding the depth of the great pond of her separation from her lover."

(Illustration of) नावइ :

(3) प्रेक्ष्य मुखं जिनवरस्य दीर्घ-नयन-सलावण्यम् ।
इव गुरु – मत्सर – भृतः ज्वलने प्रविशति लवणम् ॥

" Seeing the lovely face of जिनवर with long eyes, salt leaps into fire as if on account of extreme jealousy."

The underlying idea is like this :

" When जिनवर comes from outside salt is moved round his head and thrown into the fire to ward off any evil influence of onlookers. The poet fancies that the लावण्य (' beauty ' ; पक्षे, ' salinity ') of जिनवर is so transcendentally great that it drives लवण into a rage, which therefore, leaps into fire."

(Illustration of) जणि :

(4) चम्पक – कुसुमस्य मध्ये सखि भ्रमरः प्रविष्टः ।
शोभते इन्द्रनीलः इव कनके उपविष्टः ॥

"Right in the centre of the Campaka flower, O friend, a bee has set (lit. 'entered'); it look lovely, like the इन्द्रनील jewel set in gold."

The metre is of 11 + 10 mātrās.

(Illustration of) जणु :

'निरुपम–रसु पिएं पिअवि जणु'।

(='निरुपमं रस प्रियेण पीत्वा इव।') (Vide : sūtra 401.3)

445. (अपभ्रंशे) लिङ्गं अतन्त्रम्।

In Apabhraṁśa the gender (of a word) is often different (from its gender in Sanskrit): e. g.

'गयकुंभइं दारंतु'।

(='गजाना कुंभान् दारयन्तम।') (Vide : sūtra 345.1)

Here the originally Masculine noun (कुंभ) has been declined as a Neuter noun.

(Another illustration :)

(1) अभ्राणि लग्नानि पर्वतेषु पथिकः रुदन् याति।
यः ईदृग्–गिरि–गिलन–मनाः सः किम् धन्यायाः (प्रति) घनायते॥

"The clouds are shrowding the mountains. (Seeing this) the traveller hurries up (lit. 'moves') crying. He is frightened : 'when it (i. e. 'the cloud') is so intent on swallowing up such (= vast) mountains, will it ever spare his beloved ?' "

Here अब्भा is Masculine though the original Sanskrit word (अभ्रम्) is Neuter.

(2) पादे विलग्नं अन्त्रं शिरः स्रस्तं स्कन्धे।
तथापि कटारिकायां (=क्षुरिकाया) (यस्य) हस्तः (स्थितः), बलीक्रिये (तस्मै) कान्ताय॥

"The bowels are entwining the feet, and the (chopped) head has been resting on the shoulder; yet the hand has firmly grasped the dagger—for such, my lord, I would give away my life."

Here अंत्रडी is Feminine, though the original word (अन्त्र) is Neuter.

(3) शिरसि आरूढाः खादन्ति फलानि पुनः शाखाः मोटयन्ति (=भुञ्जन्ति, वक्रीकुर्वन्ति) ।
तथापि महाद्रुमाः शकुनीनां अपराधितं न कुर्वन्ति ॥

"Perching on the tops they eat the fruits, and also twist (or 'break') the branches; still the great trees do not punish the birds"

Here डालइं is Neuter, though usually it (डाली) is Feminine.

446. (अपभ्रंशे प्रायः) शौरसेनीवत् (कार्यं भवति) ।

In Apabhraṁśa, there often occur changes as in the Śaurasenī Prākrit.

(1) शीर्षे शेखरः क्षण विनिर्मापितः
क्षणं कण्ठे प्रालम्बः कृतः ।
रत्या विहितं क्षणं मुण्डमालिकायां (=मुण्डमालिका)
यत् प्रणयेन तं नमत
कुसुमदामकोदण्डं कामस्य ॥

"Shaped by Rati as a (floral) crown—hung (lit. made) (like) a wreath round her neck at another moment; then (again) fondly turned (by her) into a मुण्डमाला ('a chaplet worn on the head')— pay your homage to that bow of Cupid, (fashioned from) flower-wreaths."

Here विणिम्मविदु, रदिए, किदु, विहिदु all reveal the predominantly Śaurasenī trait (त् > द्). It is likely that the illustration has been taken from the Apabhraṁśa spoken in the region where formerly Śaurasenī Prākrit was current

The metre is Mātrā (cf. sūtra 350.2).

447. (अष्टमाध्याये पादचतुष्टयनिर्दिष्टसर्वप्राकृतभाषालक्षणानां) व्यत्ययः च (भवति) ।

The characteristics of the (different) Prākrit dialects sometimes interchange. For example, as it is recorded that in Māgadhī तिष्ठ changes to चिष्ठ (acc. to sūtra तिष्ठश्चिष्ठः । VIII-4 -298), so also (तिष्ठ changes to चिष्ठ) in Prākrit, Paiśācī and Śaurasenī. E. g. 'चिष्ठदि' = 'तिष्ठति' (= 'He stands'), (current primarily in Māgadhī, but sometimes encountered also in general Prākrit — e. g. Mahārāstrī, Paiśācī and Śaurasenī.

(Similarly) in Apabhraṁśa र् as a second member of a compound consonant is elided alternatively, which (trait) also (sometimes) occurs in Māgadhī. Note, for example

'शद – माणुश – मश – भालके कुंभ – शहश्र – वशाहे शचिदे ' ।
(= ' शत – मानुष – मांस – भारकः कुंभ – सहस्र – वशाया संचितः ।)

(note retention of र् in शहश्र < सहस्र ; Vide sūtra VIII. 4. 398) and similar other illustrations.

This interchange (व्यत्यय) is not just confined to phonetic characteristics (भाषालक्षणानि) (of the Prākrit dialects); sometimes even the verbal terminations of tenses also interchange. For example, the terminations of the Present tense are often found used in the Past tense. e g. ' अह पेच्छइ रहु – तणओ ' । Here पेच्छइ (usually Present 3rd pers sing.) is used for the Past tense : (= अथ प्रेक्षांचक्रे रघुतनय ।)

Similarly also, as in ' आभासइ रयणीअरे ' (= ' आबभाषे रजनीचरान्), the Present term. is used for the Past tense.

(Often) the terminations of the Past tense are (found) used for the Present tense. e. g. 'सोहीअ एप वंठो ।' (= शृणोति एप वंठः ।)

As a matter of fact most of the above changes can be easily traced to free interborrowing between the different regional dialects.

448. शेषं (अष्टमाध्याये अनुक्तं) संस्कृतवत् सिद्धं (भवति) ।

If any changes are found which are not discussed in this eighth chapter on the Prākrit languages, they can be explained by the (rules of the) Sanskrit language, laid down in the first seven chapters. e. g.

(1) अधःस्थितसूर्यनिवारणाय छत्रं अध: इव वहन्ती ।
जयति सशेषा वराहश्वासदूरोत्क्षिप्ता पृथ्वी ॥

"The earth blown up by the breath of वराह (the boar-incarnation of Visnu, who resurrected it) flourishes, with the शेष (the Divine Serpent on whose hoods it is supported), appearing as if it is carrying an umbrella on the downward side to ward off the (rays of the) Sun shining below."

Here निवारणाय is the illustration (of a Sanskrit form used in Prākrit). There is no Dative in Prākrit; the Dative here (in निवारणाय) is derived from Sanskrit. Sometimes even where specific changes are laid down in Prakrit, we, frequently, come across formations based on Sanskrit. For instance, in Prakrit the word उरस् in Locative singular has two forms—उरे and उरम्मि, but sometimes there also occurs the form उरसि (which is a purely Sanskrit form). In this way are to be accounted the

forms सिरे, सिरम्मि, (and along with them) सिरसि; and सरे, सरम्मि, (and with them) सरसि.

The word सिद्धं occurs as an auspicious invocation, which gives the blessing of long life and prosperity to the students (of this treatise).

Thus ends the fourth section (पाद) of the Eighth Chapter of the grammatical treatise named सिद्धहेमचन्द्र prepared by Ācārya Śrī Hemcandra.

Here also ends the Commentary named प्रकाशिका on the grammar named सिद्धहेमचन्द्रशब्दानुशासन.

PRAŚASTI (A Panegyric of the patron)

1. There flourished (in the past) a King named Mūlarāja, with mighty arms, capable of supporting the burden of the earth, bearing the imprint of the four limitless oceans; who was like a lion to the onrushing enemy-elephants; and was an ornament of the virtuous Culukya race.

2. In his line was born King Jayasiṁhadeva, (resplendent like) the Sun by his great प्रताप ('valour'; पक्षे, 'heat'); who left an impress of (lit. 'inscribed') his name—सिद्धराज—(both) on the Sun (in the form) of his (brilliant) dynasty, and also on the moon

3. He, having skilfully employed the four expedients (against the enemies) consummately, having conquered and governed the earth girdled by the four oceans, having disciplined his mind by the four sciences (विद्याs—आन्वीक्षिकी, त्रयी, वार्ता and दण्डनीति), and having acquired self-restraint, had reached the last extremity in the attainment of the four objects of life (पुरुषार्थs—धर्म, अर्थ, काम and मोक्ष).

4. By him, who was harrassed by a multitude of grammars (which were in themselves) extremely diffuse, difficult to learn, and loose (in structure)—by him requested, Muni Hemacandra prepared systematically this unique (treatise on) grammar.

परिशिष्टम्

दोधकवृत्तिः

श्रीगौतमाय नमः ॥

ढोल्ला सा०— नायकः श्यामलः, 'धण' नायिका प्रिया चंपकवर्णी। 'नाइं' उत्प्रेक्षते – 'सुवर्णरेखा कषपट्टके दत्ता' इत्यर्थः॥ १ [1]

ढोल्ला म०— हे नायक, त्वं मया वारितः। दीर्घं मानं मा कुरु। निद्रया गमिष्यति रात्रिः अवस्कंदो विभातं शीघ्रं भवति॥ २

बिट्टिए०— हे पुत्रिके, मया त्वं भणिता। मा कुरु वक्रां दृष्टिम्। हे पुत्रिके, सकर्णा भल्लिर्यथा मारयति हृदये प्रविष्टा॥ ३

एइ ति०— एते ते घोटका। एषा सा स्थली। एते ते निशिताः खड्गाः। अत्र मनुष्यत्वं ज्ञायते यो नापि वल्गां वालयति॥ ४

दहमु०— दशमुखः भुवनभयंकरः। तोषितशङ्करः – पूजितशङ्करः। निर्गतो रथवरे चटितः। उत्प्रेक्षते – 'दैवेन चतुर्मुखं ब्रह्माणं षण्मुखं कार्त्तिकेयं ध्यात्वा एकस्मिन् रावणे लगित्वा'। कोऽर्थः – एतद्द्वयमपि एकीकृत्य रावणो घटितो निर्मितः, दशमुखत्वादित्यर्थः॥ ५

अगलि०— अगलितस्नेहाः [2] निवृत्ताः चलिताः। तेषामुपरि योजनलक्षमपि यातु। वर्षशतेनापि यो मिलति। सखि स सौख्याना [3] स्थानं तेषामित्यर्थः॥ ६

अंगहिं०— अङ्गैरङ्गं न मिलितं [4], हे सखि, अधरेण अधरो न प्राप्तः। प्रियस्य मुखकमलं पश्यन्त्या एवमेव सुरतं सप्राप्तम् (sic? समाप्तम्)॥ ७

ये महु०— ये मम दत्ता दिवसा दयितेन प्रवसता चलता सता, तान्दिवसान् गणयन्त्या ममाङ्गुल्यो जर्जरिता नखेन॥ ८

सायरु०— सागरः उपरि तृणानि धरति, तले क्षिपति [5] रत्नानि। स्वामी सुभृत्यमपि परिहरति, सन्मानयति खलान् – दुर्जनान्॥ ९

गुणेहिं०— गुणै नं संपदः परं कीर्तिश्च। जीवा फलानि लिखितानि भुञ्जते। दृष्टान्तयति – केसरी [6] कपर्दिकामपि न लभते, गजास्तु लक्षैः गृह्यन्ते॥ १०

---

1 Emended, MS takes vss 1 & 2 together and number them as 1.
2 MS स्नेहा. 3 MS सुख्याना 4 MS मिल्तं. 5 MS क्षपति. 6 MS केशरी

वच्छहे०— जनो वृक्षात्फलानि गृह्णाति[7], कटुपल्लवानि वर्जयति। ततोऽपि महाद्रुमस्तान् कटुपल्लवान् उत्सङ्गे[8] धरति। क इव, स्वजन इव, यथा स्वजनः[9] कटुपल्लवप्रायानपि जनान् धरति न तु तिरस्करोतीत्यर्थः॥ ११

दूरुड्डा०— दूरोड्डानेन दूरगमनेन पतितः खलो दुर्जनः आत्मानं जनं च मारयति। यथा गिरिशृङ्गेभ्यः पतिता शिला आत्मानमन्यमपि चूर्णं करोतीत्यर्थः॥ १२

जो गुण०— य आत्मीयान् गुणान् गोपायति, परस्य गुणान् प्रकटान् करोति। अहं कलियुगे[10] तस्य दुर्लभस्य स्वजनस्य बलि–पूजां क्रिये इत्यर्थः॥ १३

तणहं०— तृणानां तृतीया भङ्गी नापि तृतीयप्रकारो नाप्यस्ति, तेन कारणेन अवटत्तटे[11] – कूपतटे वसन्ति। अथ यो जनस्तृणानि लगित्वा उत्तरति, अथ इति अथवा तृणानि जनेन सह स्वयं मज्जन्ति। अन्योऽपि यः प्रकारद्वयं कर्तुकामो भवति स विषमस्थाने वसति। प्रकारद्वयं किं म्रियते वा शत्रून् जयति वेति भावार्थः॥ १४

दइवु०— देवो वने तरूणां पक्वफलानि शकुनीनां पक्षिणां घटयति, तत् सौख्यं वरम्। कर्णयोः प्रविष्टानि खलवचनानि सौख्यं नेत्यर्थः॥ १५

धवलु०— धवलो वृषभः धौरेयो विषीदति विषादं करोति इत्यर्थः। किं कृत्वा। स्वामिनो गुरुं भारं प्रेक्ष्य। किं मनसि अचिन्तयत् तदाह। अहं किं न[12] योजितः। क्व, द्वयोर्दिशोः[13]। किं कृत्वा, खण्डौ कृत्वा – इत्यर्थः॥ १६

गिरिहे०[14]— निःसामान्यः सर्वोऽपि जनो गृहं मुक्त्वा गिरेः शिलातलं गृह्णाति, तरोः फलं गृह्णाति। ततोऽपि मनुष्येभ्यः[15] अरण्यं न रोचते इत्यर्थः॥ १७

तरुहुं०— मुनयोऽपि तरुभ्योऽपि वल्कलं परिधानं फलमशनं च क्रमेण लभन्ते। स्वामिभ्यः इदमर्गलमधिकं, यद् भृत्या आदरं गृह्णन्ति इत्यर्थः॥ १८

अग्गिएं०[16]— अग्निना जगदुष्णं भवति, तथा वातेन शीतलं भवति। यः पुनः अग्निनापि शीतलस्तस्योष्णत्वं कथं, न कथमपीत्यर्थः॥ १९

विप्पिअ०— हे आर्ये, हे सखि, विप्रियकारको अप्रियंकारको यद्यपि प्रियः ततोऽपि तं आनय। अग्निना दग्धं यद्यपि गृहं ततोऽपि तेनाग्निना सह कार्यं भवेत्॥ २०

जिम्व जि०— यथा यथा श्यामला[17] स्त्री लोचनानां निश्चितं वक्रत्वं शिक्षते[18] तथा तथा मन्मथो निजकशरान् खरप्रस्तरे कठोरपाषाणे तीक्ष्णान् करोतीत्यर्थः॥ २१

---

7 MS गृहाति. 8 MS उच्छंगे 9 MS स्वजना. 10 MS कुलयुगे. 11 MS अवतटे. 12 MS तु 13 MS दशो. 14 MS गिरेहि. 15 MS मनुषेभ्यः. 16 MS अग्गिए. 17 MS स्यामलो. 18 MS शिक्षिति.

संगर०— हे सखीति गम्यते । तं मदीयं कान्तं पश्य, यः सङ्ग्रामशतेषु वर्ण्यते । किं कुर्वन्तं, अतिमत्तानां त्यक्ताङ्कुशाना गजानां कुम्भान् दारयन्तमीत्यर्थः ॥ २२

निय मु०— मुग्धा स्त्री निजमुखकरै निजवदनकिरणैरपि अन्धकारे करं हस्तं प्रतिप्रेक्षते पश्यति । शशिमण्डलचन्द्रिकया पुनर्दूरे कथं न पश्यति इत्यर्थः ॥ २३

तुच्छ म० अन्नु जु०— युग्मं । अनयोरर्थ. । तुच्छरागेति दूती[19]कृतनायकस्यामन्त्रणम् । हे तुच्छराग, तस्या नायिकाया.[20] अन्यद् यद् तुच्छं तदाख्यातुं न याति । नायिकायाः[20] किंभूताया.[21] तुच्छमध्यायाः । पुनः किंभूतायाः, तुच्छजल्पनशीलायाः । पु० (=पुनः किंभूतायाः) तुच्छाच्छरोमावल्याः । पु० तुच्छतरहासायाः । पुनः प्रियवचनमलभमानायाः । पु० तुच्छकायमन्मथनिवासायाः तुच्छकायमन्मथनिवासो यस्याः सा । तुच्छकायत्वं भर्तृविरहात्[22] । कठरीत्याश्चर्ये । येन कारणेन मुग्धायाः स्तनान्तरं मनोवर्त्मनि न माति । स्तनयोरतिपीनत्वादंतरस्यातितुच्छत्वं वर्णितं इत्यर्थः ॥ २४–२५

फोडेति०— यौ स्तनौ आत्मीयं हृदयं स्फोटयतः तयोः परकीया घृणा दया किम् । हे लोका, आत्मानं रक्षत, यतः कारणात् वालाया. विषमौ स्तनौ जाताविल्यर्थः ॥ २६

भल्ला हु०— हे भगिनि इदं भव्यं भूतं, यन्मदीयः कान्तो मारितः । यदि भग्नो गृहमैष्यत् तर्हि वयस्याभ्यो वयस्यानां वा – सखीभ्यो – लज्जां प्राप्स्यम् ॥ २७

वायस०— वायसमुड्डापयन्त्या सत्या स्त्रिया सहसेति प्रियो दृष्टः । अर्द्धानि वलयानि मह्यां गतानि भूमौ पतितानि । अर्द्धानि त्रटदिति कृत्वा स्फुटितानि इत्यर्थः ॥ २८

कमल०— अलिकुलानि कमलानि मुक्त्वा करिगण्डानि काङ्क्षन्ति । येषामसुलभं दुर्लभमेष्टुं 'भलि' कदाग्रहो भवति, ते दूरं नापि गणयन्तीत्यर्थः ॥ २९

भग्गउं०— हे सखीति गम्यते । हे सखि, यथा द्वितीयादितिथौ शशिरेखा चन्द्ररेखा प्रकटीभवति तथा प्रियस्य करे करवालं खड्गमुन्मील्यते प्रकटीभवति । किं कृत्वा, निजकवलं भग्नं दृष्ट्वा परस्य वलं प्रसृतं दृष्ट्वेत्यर्थ. ॥ ३०

जइ त०— हे तिलतार – तिलवत् स्निग्धा तारा कनीनिका यस्य स, तस्य सबोधनम् । यदि तव स्नेहो मया सह नापि त्रुटित., तत्कस्मादहं त्वया वक्राभ्या लोचनाभ्यां शतवारं विलोक्ये – इत्यर्थः ॥ ३१

---

19 MS दुती. 20 MS नायकाया. 21 MS किंभूताया. 22 MS भतुविरहात्.

जहिं क०— यस्मिन् शरेण शिर[23]श्छिद्यते, यस्मिन् खड्गेन खड्गः छिद्यते[24], तस्मिन् तादृशे भटघटानिवहे कान्तो मार्गं प्रकाशयतीत्यर्थः ॥ ३२

एक्कहिं० अगिहि०[25]— युग्मं । अनयोरर्थः । तस्या मुग्धाया एकस्मिन्नक्षिणि[26] श्रावणः अन्यस्मिन्नक्षिणि[26] भाद्रपदः । को भावः, यथा एतौ द्वौ मासौ स्राविणौ[27] तथाक्षिद्वयमप्यश्रुजलस्रावि[28]त्वान्मासद्वयतुल्यम् । महीतलस्रस्तरे[29] भूतलसस्तारके माधवो वसन्तः, पल्लवमयत्वात् । गण्डस्थले शरत् तस्या. कुसुमादिना पाण्डुत्वात् । अङ्गेषु ग्रीष्मः तापबाहुल्यात् । सुखासिकातिलवने मार्गशीर्षं । यथा तिलवनानामुच्छेदः स्यात् तथा सुखावस्थानस्योच्छेदः । मुखपङ्कजे शिशिर आवासितः । यथा शिशिरे पङ्कजाना म्लानत्वं, तथा मुखपङ्कजस्यापि । स्त्रीणां वियोगावस्थायामेतानि चिह्नानि स्युः तेनेत्युक्तम् ॥ ३३–३४

हिअडा०— हे हृदय त्वं त्रटदिति कृत्वा स्फुट, कालक्षेपेन कालविलम्बेन किम् । अहं[30] पश्यामि हतविधिस्त्वया विना दुःखशतानि कुत्र स्थापयति इत्यर्थः ॥ ३५

कन्तु म०— हे हले हे सखिके मदीय.[31] कान्तो निश्चयेन यस्य रुष्यति तस्य स्थानं स्फेटयति । कैः, अर्थैः शस्त्रैः हस्तैरपि ॥ ३६

जीविउ०— जीवितं कस्य वल्लभं न स्यात्, धनं पुनः कस्येष्टं न स्यात् । विशिष्टो मनुजोऽवसरे निपतिते द्वे अपि जीवितधने[32] तृणसमे गणयति इत्यर्थः ॥ ३७

एह कु०— एषा कुमारी, एष अहं नरः, एतन्मनोरथस्थानम् । ईदृशं चिन्तयता[33] वढाना मूर्खाणा पश्चाद्विभातं भवति इत्यर्थः ॥ ३८

जइ पु०— काचित् स्त्री पथिकं प्रत्याह । यदि बृहन्ति गृहाणि पृच्छथ ततो बृहन्ति अमूनि प्रत्यक्षोपलभ्यमानानि वर्तन्ते पृच्छ वा । चेद्दानाभिलाषीति शेषः, तथा कुटीरके विह्वलितजनाभ्युद्धरण पीडितजनाभ्युद्धरण कान्तं पश्येत्यर्थः ॥ ३९

आयइं०— लोकस्य इमानि लोचनानि जाति स्मरन्ति न भ्रान्ति नं संदेहः । अप्रिये दृष्टे सति मुकुलन्ति सकोचं प्राप्नुवन्ति । प्रिये दृष्टे सति विकसन्ति इत्यर्थः[34] ॥ ४०

सोसउ०— चियेति निश्चयेन उदधिः शुष्यतु मा शुष्यतु वा । तेन समुद्रशोषणेन समुद्राशोषणेन वा वडवानलस्य किम् । यदिति क्रियाविशेषणम् । यत् जले ज्वलनो

---

23 MS शिरस् 24 MS छिद्यते 25 MS अगिहि 26 MS ०क्षि 27 MS श्राविणौ 28 MS ०श्रावि. 29 MS ०श्रस्तरे 30 MS अहं 31 MS मदीय. 32 MS जीवतधने 33 MS चिंतता 34 MS त्यर्थ ।

ज्वलति, अनेन जलज्वलनेन तस्य वडवानलस्य किं न पर्याप्त, किं न सृतमित्यर्थः ॥ ४१

आयहो०— अस्य दग्धकलेवरस्य यद्दाहितं तदेव सारम् । मरणानन्तरमिति शेषः । यदि आच्छाद्यते स्थाप्यते ततः कुथ्यति, अथ दह्यते ततः क्षारो भस्म स्यादित्यर्थः ॥ ४२

साहु वि०— सर्वो लोक उत्ताम्यति आकुलीभवति । किमर्थं, बृहत्त्वस्यार्थे । परं बृहत्त्वं हस्तेन मुत्कुलेन प्राप्यते । को भाव, जनै. महत्त्वं तदा प्राप्यते चेद्दानादिगुणा[35] स्युरिति भाव ॥ ४३

जइ सु०— हे दूति स यदि गृहं नायति नागच्छति तर्हि तव अधोमुखं कथम् । हे सखिके यस्तव वचनं खण्डयति स मम प्रियो न भवतीत्यर्थः ॥ ४४

काइं न०— पूर्ववत् ॥

सुपुरि०— सुपुरुषाः कङ्गोः धान्यस्य अनुहरन्ते सदृशा भवन्ति, भण कथय केन कार्येण । उच्यते, यथा यथा वृद्धत्वं लभन्ते तथा तथा शिरसा नमन्तीत्यर्थः ॥ ४५

जइ स०— कस्याश्चित् देशान्तरं भर्ता गतोऽस्ति, स मेघ प्रत्याह । सा स्त्री यदि सस्नेहा भविष्यति तदा मृता भविष्यति, मम विरहात् । अथ जीवति, तर्हि नि.स्नेहा[36] । द्वाभ्या सस्नेहनि स्नेह[37]लक्षणाभ्यां प्रिया गतिका गता । तर्हि हे खलमेघ – हे दुर्जन[38]मेघ, त्वं किं गर्जसे इत्यर्थः ॥ ४६

भमर०— हे भ्रमर, त्वमरण्ये मा रुणझुणु शब्दं मा कुरु, ता दिश विलोक्य मा रुदिहि । पुनः सा मालती देशान्तरिता यस्या वियोगे त्वं म्रियसे इत्यर्थः ॥ ४७

पइं मु०— गाथा । त्वया मुक्तानामपि पत्राणां पत्रत्वं न स्फिटति । तव पुनश्छाया यदि भवेत् ततस्तर्हि तै. पत्रैरेव नान्यथेत्यर्थः ॥ ४८

महु हि०— काचित् नायिकाऽन्यासक्तं पतिं वक्ति । मम हृदयं त्वया गृहीतमिति शेष. । तया त्वं गृहीतः[39] । सापि अन्येनापि नव्यते । हे प्रियाऽह किं करोमि, त्वं किं करोषि, मत्स्येन मत्स्यो गिल्यते इत्यर्थ ॥ ४९

पइं म०— त्वयि मयि द्वयोरपि रणगतयो. को जयश्रियं तर्कयति – अभिलपति । को यमगृहिणीं केशैर्गृहीत्वा सुखं यथास्यात्तथा तिष्ठति, त्वं भण – कथयेत्यर्थः ॥ ५०

पइ मे०— स्त्री कथयति त्वा मुञ्चन्त्या मम मरण, मां मुञ्चतस्तव मरणम् । दृष्टान्त – यथा सारसः पक्षी यस्य यो दूरे स कृतान्तस्य साध्यो भवति, मरणं गच्छतीत्यर्थ. ॥ ५१

---

35 MS ०गुणा 36 MS निस्नेहा 37 MS निस्नेह 38 MS दुर्ज्जन. 39 MS गृहितः.

तुम्हेहिं[40]०— युष्माभिरस्माभि र्यत् कृतं तत्बहुकजनेन दृष्टम् । यत् किं कृतं तदाह । तत्तावन्मानः[41] समरभर एकक्षणेन निर्जित इत्यर्थः ॥ ५२

तउ गुण०— महीमण्डलेऽन्ये जना यदि उपेत्य तव पार्श्वे समागत्य तव गुणसपदं शिक्षन्ते[42], तव मतिं शिक्षन्ते[42], तवानुत्तरां क्षांतिं शिक्षन्ते[42], तदा वरमिति गम्यते इत्यर्थः ॥ ५३

अम्हे थो०[43]— वयं स्तोकाः रिपवस्तु बहुका. । हे मुग्धे गगनतल निभालय—पश्य, कति जना ज्योत्स्नां कुर्वन्ति । एकश्चन्द्र एवेत्यर्थः ॥ ५४

अवणु०— ये केऽपि परकीया. पथिका अम्लत्वं[44] स्नेहं लगयित्वा गताः, तेऽपि अवश्यं निश्चितं सुखासिकाया न स्वपन्ति । यथा वयं तथा तेऽपि इत्यर्थः ॥ ५५

मइं जा०— हे प्रिय, मया ज्ञातं—विरहिताना पुरुषाणां कापि धरा अवलम्बनं भवति । कदा — विकाले, सन्ध्याकाले । णवरं केवलं यथा दिनकरः क्षयकाले गतस्तथा मृगाङ्कोऽपि तपतीत्यर्थः ॥ ५६

महु कं०— हे हल्लि हे सखि मम कान्तस्य द्वौ दोषौ स्तः, अनर्थकं मा जल्प । कौ द्वौ दोषौ तदाह । एकस्तावद्दानं ददतः सत परं केवलं अहमुद्धरिता । अपरस्तावत् युध्यतः षड्गमुद्धरितमिति निन्दास्तुतिरित्यर्थः ॥ ५७

जइ भ०— हे सखि यदि परकीया भग्नास्ततो मम प्रियेण । अथास्माकं सवन्धिनश्चेत् भग्ना[45]स्ततस्तेन मम भर्त्रा मारितेनैवेत्यर्थः ॥ ५८

मुह क०— तस्या. मुखकवरीवन्धौ वदनवेणीवन्धौ शोभां धरतः । नं, उत्प्रेक्षते —शशिराहू[46] मल्लयुद्धं कुरुत. । तस्याः कुरलाः केशाः शोभन्ते, किं (=किंभूताः), भ्रमरकुलतुलिताः । नं, उत्प्रेक्षते—तिमिरडिम्भा अन्धकारवालका मिलित्वा क्रीडन्तीत्यर्थः ॥ ५९

वप्पीहा०— हे वप्पीह प्रिय प्रिय इति भणित्वा कियत् रोदिषि । हे हताश, तव जलधरेण मम वल्लभेन द्वयोरपि आशा न पूरितेत्यर्थः ॥ ६०

वप्पीहा०— हे वप्पीहक, किं वारंवारं कथनेन । हे निर्घृण[47], हे निर्लज्ज, विमलजलेन सागरे भृते एकामपि धारां न लभसे—इत्यर्थः ॥ ६१

---

40 MS तुम्हेहि 41 MS तत्तावत् मान. 42 MS शिक्षयंति. 43 MS वो. 44 MS अम्लत्तं 45 MS भग्ना. 46 शशिराहु. 47 निघृण.

आयहिं०— हे गौरि, हे पार्वति[48], त्वमस्मिन जन्मनि अन्यस्मिन्नपि जन्मनि मम कान्तं दद्याः, यो हसन् मत्ताना त्यक्ताङ्कुशाना गजाना सगच्छते – सन्मुखो भवतीत्यर्थः ॥ ६२

वलि अ०— वलेरभ्यर्थने सोपि मधुमथनो नारायणोऽपि लघुकीभूतः । अथ यदीच्छत वृद्धत्वं वृहत्वं तर्हि परं ददत, कोऽपि मा मार्गयत[49] – इत्यर्थः ॥ ६३

विहि वि०— विधिर्विनटयतु, ग्रहाः पीडयन्तु, हे प्रिये विपादं मा कुरु। वेषमिव संपदं कर्षामि यदि व्यवसायोऽर्घति स्यात् । तदा सपद. सुलभा इत्यर्थः ॥ ६४

खग्गि वि०— हे प्रिये, खड्गेन विसाधितं लभामहे तस्मिन् देशे यामः । वयं रणदुर्भिक्षेण भग्ना युद्धेन विना न वलामहे न रतिं प्राप्नुमः इत्यर्थः ॥ ६५

कुजर०— हे कुंजर मा स्मर सल्लकीः, सरलान् दीर्घान् श्वासान्[50] मा मुञ्च। विधिवशेन ये कवलाः प्राप्तास्तान् चर मानं मा मुञ्चेत्यर्थः ॥ ६६

भमरा०— हे भ्रमर अत्रापि लिम्बे तावत् कति दिवसान् विलम्बस्व, यावत् घनपत्रवान् छायावहुलः कदम्बः प्रफुल्लतीत्यर्थः ॥ ६७

प्रिय ए०— हे प्रिय इदानीं करे सल्लं भल्लं कुरु, त्वं करवालं मुञ्च, येन कारणेन वराका. कापालिका योगिनः कपालं लान्तीत्यर्थ ॥ ६८

दिअहा०— दिवसा वेगै यान्ति, मनोरथाः पश्चात् पतन्ति। यदस्ति तन्मान्यते भुज्यते । भविष्यति इति कुर्वन् मास्व मा तिष्ठेत्यर्थः ॥ ६९

संता भो०— यः सतो विद्यमानान् भोगान् परिहरति तस्य कान्तस्य वलिं पूजां क्रिये । यस्य शी र्षं खल्वाटं तस्य दैवेनैव मुण्डितम् । को भावः । यस्य भोगा न सन्ति स तु स्वयमेव त्यजतीत्यर्थः ॥ ७०

अइ तुं०—यत् स्तनानां अति तुङ्गत्वं स छेदकः छेहु न तु लाभः। हे सखि, यदि कथमपि त्रुटिवशेन कालविलम्बेन नाथोऽधरे प्रभवति अन्यथा लगत्येव न, स्तनयोरतितुङ्गत्वादित्यर्थः ॥ ७१

एत्तउं०— दुर्योधनोक्तिरियम् । शकुनिर्भीम[51]मातुल ईयत् ब्रूत्वा (=उक्त्वा) स्थितः, अहं ततस्तर्हि जाने। पुनर्दु.शासनो[52] ब्रूत्वा (=उक्त्वा) स्थितः । यदि एष हरिर्ममाग्रे ब्रूत्वा (=उक्त्वा) तिष्ठतीति शेषः ॥ ७२

---

48 MS पार्वती. 49 MS मार्ग्यत. 50 MS स्वास 51 MS शकुनिर्भीम०
52 MS पुनर्दु शानो.

जिम ति०— यथा तथा शशी चन्द्रस्तीक्ष्णान् करान् त्यात्वा यच्चतक्षिप्यत ततो जगति गौर्याश्चन्द्राननाया:[53] मुखकमलेन सह वागपि सद्यातामलस्थेत्यर्थः ॥ ७३

चुडुल्लु०— हे मुग्धे कपोले निहितः स्थापितश्चूटक चूर्णीभविष्यति । किं० (= किम्भूत.) चूटक. । श्वासानलज्वाला[54]दग्ध. । पुन.[55] किं० । बाष्पसलिलसंसिक्त इत्यर्थः ॥ ७४

अवभड०— प्रेमशब्देन प्रिया वाच्या अभेदोपचारात् । यथा प्रेमवतीति उच्यते तथा प्रेमापीत्युच्यते । प्रियमिति शेष' । प्रियमन्भउर्वचिड इति अनुव्रज्य मुत्काप्य यावत् द्वौ पादौ निवर्तते तावत् सर्वाशनरिपुसंभवस्य चन्द्रस्य किरणा' परिवृत्ताः प्रसृता इत्यर्थ. । सर्वमश्नातीति नंद्यादि इत्यन् प्रत्ययः । सर्वाशनोऽग्निः तस्य रिपुर्जलं तत्संभवश्चन्द्रः ॥ ७५

हियइ०— गौरी स्त्री हृदये शल्यायते[56] । मेघ गगने गर्जति । वर्षारात्रौ प्रवासिकानां चलितानां विषमं सङ्कटमेतदित्यर्थ. ॥ ७६

अम्मि प०— हे अम्ब मम पयोधरौ वज्रमयौ स्तः, यौ नित्यमेव तस्य मम कान्तस्य सन्मुखौ तिष्ठतः । तस्येति कस्य — यस्याग्रे गजघटाः[57] समराङ्गणे भङ्क्त्वा यान्तीत्यर्थः ॥ ७७

पुत्ते जा०— जातेन पुत्रेण को गुणः, मृतेन पुत्रेण कोऽप्यगुणः[58] । येन पुत्रेण सतेति गम्यते । या पैतृकी भूमिरपरेणाक्राम्यत इत्यर्थः ॥ ७८

त तेत्तु०— सागरस्य तत्तावज्जलं स तावन्नाम्नो विस्तारः । परं केवलं तृषाया निवारणं पल[59]मपि नैव स्यादिति शेषः । असारः सन् शब्दायते इत्यर्थः ॥ ७९

ज दिट्ठ०— असतीभिर्यत्सोमग्रहणं दृष्ट्वा तन्निःशङ्क[60] यथा स्यात् तथा हसितम् । हे राहो. प्रियमानुषविक्षोभकरं इष्टपुरुषवियोगकरं मृगाङ्कं गिलगिलेत्यर्थः ॥ ८०

अम्मीए०— स्त्री कथयति, हे अम्ब स्वस्थावस्थे' स्वस्थचित्ते. सुखेन मानश्चिन्त्यते, अहङ्कारः क्रियते । परं प्रिये दृष्टे सति हल्लोहलेन व्याकुलत्वेन कः आत्मानं चेतयतीत्यर्थ' ॥ ८१

---

53 MS चन्द्राननया: 54 MS स्वासानलज्वला. 55 MS पुन.
56 MS शल्यायन्ति. 57 MS गजघटा 58 MS कोपिगुणो
59 MS फल० 60 MS निशकं.

सवधु०— शपथं कृत्वा मया कथितं परं केवलं तस्य जन्म सफलकं यस्य त्यागो न प्रमृष्टः न मुषितः[61], दानं न गतं, यस्य चारभटी न प्रमुषिता, शूर-वृत्ति[62]र्न गता, यस्य धर्मो न च प्रमृष्टः, न प्रमुषितः इत्यर्थः ॥ ८२

जइ के०— स्त्री कथयति — यदि कथंचित् प्रियं प्राप्स्ये तर्हि अकृतं कौतुकं करिष्यामि । यथा नवे शरावे पानीयं सर्वाङ्गेण प्रविशति तथा सर्वाङ्गेण प्रवेक्ष्यामीत्यर्थः ॥ ८३

उअ क०— त्वं पश्य, कर्णिकारो वृक्षः प्रफुल्लितः काञ्चनकान्तिप्रकाशः । नं उत्प्रेक्ष्यते – गौरीवदनविनिर्जितः सन् वनवास सेवते इत्यर्थः ॥ ८४

वासु म०— व्यासो महर्षिः एतद्[63] भणति – यदि श्रुतिशास्त्रं प्रमाणं, मातॄणां[64] चरणौ नमता सतां दिवसे दिवसे गङ्गास्नानं इत्यर्थः ॥ ८५

केम स०— दुष्टो दिनः कथं समाप्यताम् । रात्रिः[65] कथं भवति । छुडु यदि सोऽपि नववधूदर्शनलालस एवंविधानिति शेषो, मनोरथान् वहतीत्यर्थः ॥ ८६

उं गोरी०— उं (= ओँ) सूचनाया, गौरीमुखविनिर्जितो मृगाङ्को वार्दले निलीनः । अन्योऽपि यः परिभूततनुः स ।न शङ्कं कथं भ्रमतीत्यर्थः ॥ ८७

विंवाह०— हे श्रीआनन्द, तन्व्या विंवाधरे रदनव्रण दन्तव्रण कथं स्थितम् । उत्तरं ददाति – जणु उत्प्रेक्ष्यते प्रियेण अधरस्य निरुपमं रसं पीत्वा शेपस्य रसस्य मुद्रा दत्तेत्यर्थः ॥ ८८

भण स०— हे सखि, मां प्रति निभृतं छन्नं यथा स्यात्तथा भण, कथय, यदि त्वया प्रियः सदोषो दृष्टः । तस्य पक्षापतितं तस्यान्यतरस्य[66] पार्श्वे स्थितं मम मनो यथा न जानाति भर्त्तेति गम्यते, ममाग्रे तथा त्वया छन्नं वाच्यमित्यर्थः ॥ ८९

मइं भ०— हे वलिराज मया त्वं भणितः, कीदृग् मार्गण एषः । वलि[67]राह । हे वढ, हे मूर्ख यादृक्तादृक् न भवति, इदृक् स्वय नारायण इत्यर्थः ॥ ९०

जइ सो०— यदि प्रजापतिः कुत्रापि शिक्षा लात्वा यत्रापि तत्रापि अत्र जगति घटयति तर्हि भण कथय, तस्याः[68] सदृक्षं को घटयतीत्यर्थः ॥ ९१

जाम्व न०— यावत् कुम्भतटे सिंहचपेटाचटत्कारो न निपतति, तावत् समस्ताना मदकलानां गजाना पदे पदे ढक्का वाद्यते इत्यर्थः ॥ ९२

---

61 MS मुखितः 62 MS सूरवृत्ति. 63 MS एतत् 64 MS मातृणां. 65 MS रात्रि 66 MS तस्याऽन्यनरस्य. 67 MS वहि० 68 MS तस्या.

तिलहं०— परं केवलं तिलानां तिलत्वं तावत्, यावत् स्नेहा न गलन्ति। स्नेहे प्रणष्टे त एव तिलाः तिला भ्रष्टा खला भवन्ति इत्यर्थः॥ ९३

जाम्वहिं०— यावज्जीवानां मध्ये विषमा कार्यगतिः एति तावदास्तामितरजनः स्वजनोप्यन्तरं ददाति पृष्टिं ददातीत्यर्थः॥ ९४

ते मुग्ग०— ये तेषां परिवेषितास्ते मुद्गाः हारिताः मुधा जाताः, येषां परस्परं युध्यतां सतां स्वामी गञ्जितः पीडित इत्यर्थः॥ ९५

वम्भ ते०— हे ब्रह्मन् ते केपि नरा विरलाः ये सर्वाङ्गैर्दक्षाः, ये वक्रास्ते वञ्चकतराः अत्यर्थं वञ्चकाः[69]। ये तु ऋजवस्ते बलीवर्द्दाः मूर्खा इत्यर्थः॥ ९६

अन्ने ते०— ते दीर्घे लोचनेऽन्ये एव। अन्यदेव तद्भुजयुगलम्। सोऽन्यो घनस्तनभारः। घनो निविडः[70]। तदन्यदेवमुखकमलम्। अन्य एव स केशकलापः। प्रायः[71] स विधिरन्य एव येन सा नितम्बिनी घटिता। कि० (=किम्भूता), सा गुणलावण्यनिधिः इत्यर्थः॥ ९७

प्राइव०— प्रायो मुनीनामपि भ्रान्तिः, ते मणीयकान् (sic मणिकान्?) गणयन्ति। अक्षये निरामये परमपदेऽद्यापि लयं न लभन्ते। किं शून्य[72]ध्यानेनेत्यर्थः॥ ९८

असु ज०— हे सखि, प्रायो गौर्या अश्रुजलेन नयनसरसी उद्वृत्ते उल्लटिते। ते सन्मुखे संप्रेषिते परं केवलं तिर्यग्[73] घातं ददत इत्यर्थः॥ ९९

एसी पि०— प्रिय एष्यति समागमिष्यति। अहं रुषिष्यामि। रुष्टां मामनुनयति मनावइ। प्रायो दयिता एतान्मनोरथान् दुष्करान् करोति, इष्टकालेऽनागमनात्, इत्यर्थः॥ १००

विरहा०— कोऽपि कविर्जले धूमं दृष्ट्वाऽह। कोऽपि पथिको विरहानलज्वालाकरालितः पीडितो ब्रुडित्वा स्थितोऽस्ति। अन्यथा शिशिरकाले शीतलजलाद्धूमः कुत उत्थित इत्यर्थः॥ १०१

महु कं०— गोष्ठस्थितस्य मम कान्तस्य कुतः कुटीरकाणि ज्वलन्ति। अथ रिपुरुधिरेण विध्यापयति, अथात्मीयेन न भ्रान्तिः इत्यर्थः॥ १०२

पिय सं०— प्रियसंगमे कुतो निद्रा प्रियस्य परोक्षस्य सप्तम्याः षष्ठी[74]। प्रिये परोक्षे सति कथं निद्रा। मया[75] द्वेऽपि विनाशिते निद्रा न एवं न तथेत्यर्थः॥ १०३

---

69 MS वंचका. 70 MS निबड. 71 MS प्राय. 72 MS शुन्य. 73 MS तियग्. 74 MS षष्टी. 75 MS ममा.

कंतु जु०— कान्तो यत् सिंहेन सहोपमीयते तन्मम मानः खण्डितः। सिंहो नीरक्षान् रक्षपालरहितान् गजान् हन्ति। प्रियः पदरक्षैः पदातिरक्षैः समं गजान् हन्तीत्यर्थः॥ १०४

चंचलु०— जीवितं चञ्चलं, मरणं ध्रुवम्, हे प्रिये रूष्यते कथम्। रोषणस्य दिवसा दिव्यानि वर्षशतानि भविष्यन्तीत्यर्थः॥ १०५

माणि प०— माने प्रणष्टे यदि तनु नं त्यज्यते ततो देशस्त्यज्यते। परं दुर्जनकरपल्लवैर्दर्श्यमानो मा भ्राम्यत न भ्रमतीत्यर्थः॥ १०६

लोणु वि०— हे मेघ मा गर्ज। लवणं लावण्यं पानीयेन विलीयते, ज्वालितो मेघो गलति, सकुटीरिका गौरी तिम्यति भीजइ॥ १०७

विहवि०— विभवे[76] प्रणष्टे वक्रः, ऋद्धौ जनसामान्यो भवति, सर्वजनतुल्यो भवति। शशी किमपि मम प्रियस्यानुहरति सदृशो भवति मनाक् नान्य इत्यर्थः॥ १०८

किर खा०— किल न खादति, न पिवति, न विद्रवति ददाति, धर्मे रूपकं न व्ययति। इह कृपणो न जानाति यथा यमस्य दूतः क्षणेन प्रभवतीत्यर्थः॥ १०९

जाइज्ज०— तत्र देशे गम्यते यत्र प्रियस्य प्रमाणं लभ्यते। यद्यागच्छति तत आनीयते। अथवा तदेव ।नवार्ण, स एवान्तः इत्यर्थः॥ ११०

जउ पव०— स्त्री कथयति – यत् प्रवसता प्रवास कुर्वता सता सह न गता, अथ तस्य वियोगेन न मृता। तर्हि तस्य सुभगजनस्य सन्देशान् ददतीभिरस्माभि र्लज्यते[77] इत्यर्थः॥ १११

एत्तहे०— मेघा जलं पिवन्ति, इतो वडवानल आवर्त्तयति शोपयति। सागरस्य गभीरिमां [sic गभीरिमाणं] पश्य, एकापि कणिका नहि अपवर्त्तते ऊना न भवतीत्यर्थः॥ ११२

जाउ म०— स्त्री कथयति। यातु। यान्तं मा पल्लवत प्रतिपेधयत। पश्यामि कति पदानि ददाति। हृदयेऽहमेव तिरश्री (sic तिरश्चीना)। (आडी रही छउं।) परं केवलं प्रियो डंबराणि करोति। न तु यास्यति इति शेषः॥ ११३

हरि न०— प्राङ्गणे हरिर्नर्तितः, लोको विस्मये पातितः। इदानीं राधापयो-धरयो यत् प्रतिभाति तद्[78] भवतु इत्यर्थः॥ ११४

---

76 MS विहवे. 77 MS लभ्यते. 78 MS तत्.

साव स०— गौरी[79] सर्वसलावण्या कापि ननीना विपर्यास्थि: । यस्य कण्टे न लगति स भट: कामुक: प्रत्युत प्रथमं म्रियते इत्यर्थ: ॥ ११५

मइं वु०— हे वृषभ मया उक्तं त्वं धुरं धर, कर्करगलिवृषभै वेयं विगोपिता: । हे धवल, हे वृषभ, त्वया विना भारो न चटति । एवमेव विषण्ण: कथमित्यर्थ: ॥ ११६

एकु क०— एक कदापि नागच्छति, अन्यत: शीघ्रं याति । हे मित्र, मया त्वं प्रमाणितो ज्ञात: – त्वया यादृश:[80] खलो नहि ॥ ११७

जिम्व सु०— यथा सत्पुरुषा: बहव: सन्तीति शेष: तथा झगटका. यथा नद्यस्तथा वलनानि, यथा गिरयस्तथा कोटराणि । तर्हि हे हृदय कथं खिद्यसे इत्यर्थ: ॥११८

जे छड्डे०— ये रत्ननिधिं मुक्त्वा आत्मानं तटे क्षिपन्ति[81], परं केवलं तेषां शङ्खानां अस्पृश्यसंसर्ग एव । ये पूत्क्रियमाणा भ्रमन्तीत्यर्थ: ॥ ११९

दिवेहिं०— हे वड[82], हे मूर्ख, दैवार्जितं खाद, मा सञ्चय[83] एकमपि द्रम्मम् । किमपि तद्[84] भयं पतति येन[85] जन्म समाप्यते इत्यर्थ: ॥ १२०

एक्कं०— हरि: सुष्ठु अन्यर्थं सर्वादरेण एकैक[86] वस्तु यद्यपि पश्यति ततोऽपि दृष्टि र्यत्रक्वापि राधा । क: शक्नोति संवरीतुं दग्धे नयने स्नेहेन पर्यस्ते व्याकुलिते इत्यर्थ: ॥ १२१

विहवे०[87]— विभवे कस्य स्थिरत्वं, यौवने कस्य गर्व: । स लेख: प्रस्थाप्यते यो लगति गाढम् । वियोगिना वचनं इदमित्यर्थ: ॥ १२२

कहिं स०— कुत्र शशी कुत्र मकरधरसमुद्र: . कुत्र बर्ही कुत्र मेघ: । दूरस्थितानामपि सज्जनानामसाधारण: स्नेह: भवतीत्यर्थ: ॥ १२३

कुंजरु०— कुञ्जरोऽन्येषु तरुषु कौतुकेन[88] हस्तं क्षिपति, मन: पुन एकस्यां शल्लक्या, यदि पृच्छत परमार्थ[89]मित्यर्थ ॥ १२४

खेड्डयं०— अस्माभि र्निश्चयं क्रीडा कृता, किं प्रजल्पन । हे स्वामिन्, अनुरक्ता: भक्ता:, अस्मान्मा त्यजेत्यर्थ: ॥ १२५

सरिहिं०[90]— सरिद्भि र्नदीभि: सरोभि: सरोवरै र्महत्सरोभिर्नाप्युद्यान[91]वनै र्देशा रम्या.[92] । हे वड, हे मूर्ख, निवसद्भि: सुजनै र्देशा रम्या भवन्तीत्यर्थ: ॥ १२६

---

79 MS गोरी. 80 MS यादृशो. 81 MS क्षपंति. 82 MS वट
83 MS सिंचतु. 84 MS तत्. 85 MS ये. 86 MS एकेकं
87 MS विहवे० विभवे० 88 MS कौतकेन. 89 MS परमार्थत०
90 MS सरहि. 91 MS नाप्युंद्यान० 92 MS रम्या.

हिअडा०—हे हृदय, हे भंडय निर्लज्ज, हे अद्भुतसार, त्वया ममाग्रे शतवारं जल्पितं, प्रियेण प्रवसता सह अहं स्फुटिष्यामि,[93] इत्यर्थः ॥ १२७

एक्क कु०—एका कुटी शरीरं पंचभिरिन्द्रियै रुद्धा। तेषां पञ्चानां पृथक् पृथक् बुद्धिः। हे भगिनि, कथय तद्गृहं कथं नन्दतु यत्र कुटुम्बं[94] आत्मच्छन्दकं, इत्यर्थः ॥ १२८

जो पुण०—यः पुनर्मनस्येव व्याकुलीभूतः सन् चिन्तयति[95] द्रम्मं न ददाति न रूपकम्। स मूढो रतिवशेन भ्रमणशीलः सन् कराग्रोल्लालितं कुन्तं भल्लं गृहे एव गणयति चालयति इत्यर्थः[96] ॥ १२९

चलहिं०—हे वाले, चलैर्वलमानैश्च लोचनै त्वया दृष्टाः तेषु[97] मकरध्वजावस्कन्दः[98] कन्दर्पधाटी पतति। कदा, अपूर्णे काले इत्यर्थः ॥ १३०

गयउ०[99]—हे हरिणाः, स केसरी गतो, यूयं निश्चिन्ता सन्तो जलं पिबत, यस्य सम्बन्धिना हुंकारेण मुखेभ्यस्तृणानि पतन्ति ॥ १३१

सत्थाव०—स्वस्थावस्थानामालपनं सर्वो लोकः करोति। परं आर्तानां मा भैषीः इति यः आश्वासनं[100] ददाति स[101] सज्जन इत्यर्थः ॥ १३२

जइ र०—हे हृदय, हे मुग्धस्वभाव, यद्यद्दृष्टं तत्र तत्र यदि रज्यसे, तत् तर्हि त्वया लोहेनेव स्फुरता सता घनस्ताप[102] सहिष्यते, इत्यर्थः ॥ १३३

मइं[103] जा०—मया ज्ञात अहं प्रेमहृदे ब्रुडिष्यामि हुहुरुत्ति शब्दानुकरणं कृत्वा। नवरं केवलं मया विप्रियनौः वियोगत्रेडा झटिति पतिता प्राप्तेत्यर्थ ॥ १३४

खज्जइ०—कसरत्कै[104] न खाद्यते घुंटै[105] न च पीयते। एवमेव सुखस्या समाधिर्भवति। क सति नयनाभ्यां प्रिये दृष्टे सतीत्यर्थ. ॥ १३५

अज्जवि०—अद्यापि नाथो ममैव गृहे सिद्धार्थान् वन्दते, अर्थाच्चलितुकामोऽस्ति। तावदेव विरहो गवाक्षेषु मर्कटचेष्टां ददातीत्यर्थः ॥ १३६

सिरि ज०—तनोऽपि मुग्धया[106] गोष्ठं[107] गोकुलं तत्र तिष्ठन्तीति[108]

---

93 MS स्फुटिष्यामि 94 MS कुटंबं 95 MS चंतयति
96 MS ऽर्थः 97 MS ते 98 MS मकरध्वजवस्कन्दः
99 MS गमउ 100 MS आस्वासनं 101 MS omits
102 MS तापाः 103 MS मइ 104 MS कसंरत्कैः
105 MS घंटै 106 MS मुग्धाया 107 MS गोष्टं
108 MS तिष्ठंनीति

गोष्ठा:[109]। 'तात्स्थ्यात्[110] तद्व्यपदेश:' इति न्यायात् गोष्ठस्था:[111] पुरुषा उत्थानो[112]पवेशनं चेष्टानुकरणं कारिता:। यस्या: स्त्रिया: शिरसि जराखंडिता लोमपुटी जीर्णा कम्बलिका वर्तते, यस्या गले विंशतिर्मणीयका: न सन्तीत्यर्थ: ॥ १३७

अम्मडि०—हे अम्ब, पश्चात्तापो वर्तते, विकाले संध्यायां प्रिय:[113] कलहायित: कलहयुक्तो विहित:। विनाशकाले विपरीता बुद्धिर्भवतीत्यर्थ: ॥ १३८

ढोल्ला ए०—हे नायक एषा परिभाषा रीति 'अतिभन' अत्यद्भुता वर्तते इति शेष:। हे प्रिय अहं तव कृते क्षयं प्राप्नोमि[114], त्वं पुनरन्यस्यार्थे क्षीयसे इत्यर्थ: ॥ १३९

सुमरि०—तद्वालभं वस्तु स्मर्यते यन्मनाक् विस्मरति। यस्मिन वस्तुनि पुन:[115] स्मरणं यावद्गतं तस्य स्नेहस्य किं नाम। न किंचिदित्यर्थ.[116] ॥ १४०

जिब्भिंदि०—जिह्वेन्द्रियं नायकं वशे कुरुत, अन्यानीन्द्रियाणि यस्याधीनानि वर्तन्ते इति शेष:। तुम्बिन्या मूले विनष्टे अवश्यं पर्णानि शुष्यन्तीत्यर्थ: ॥ १४१

एकसि०—एकश एकवारं शीलं कलङ्कितं येषां ते शीलकलङ्किनानामालोचनरूपाणि प्रायश्चित्तानि दीयन्ते। य: पुन: अनुदिवसं खण्डयति तस्य प्रायश्चित्तेन किमित्यर्थ: ॥ १४२

विरहा०—पथि मार्गे पथिको विरहानलज्वालाकरालित पीडितो[117] यस्माद्दष्ट: तं तस्मात् सर्वैरपि पथिकै मिलित्वा स एव पथिको अग्निष्ठ:[118] कृत:। लोके तु 'अंगीठउं' इति ॥ १४३

साम्वि प०—स्वामिप्रसाद:, सलज्ज: प्रिय:, सीमासंधौ वास:, बाहुबलं प्रेक्ष्य धण इति नायिका नि:श्वासं[119] मुञ्चतीत्यर्थ: ॥ १४४

पहि०—हे पथिक, गौरी दृष्टा मयेति गम्यते। किं कुर्वन्ती दृष्टा। मार्गं पश्यन्ती। पुन: कि०। अश्रुश्वासाभ्यां कंचुकं[120] तीमोद्वानं आर्द्रं[121]शुष्कं कुर्वतीत्यर्थ. ॥ १४५

पिउ०[122]—प्रिय आगत:[123]। वार्ता श्रुता। ध्वनि:[124] कर्णे प्रविष्ट:।

---

109 MS गोप्टा: 110 MS तास्थ्यान् 111 MS गोप्टस्था
112 MS उत्थनो 113 MS प्रिय 114 MS प्राप्नोति
115 MS पुन 116 MS किंदिं० 117 MS पीडतो
118 MS अग्निष्ट 119 MS निःस्वास 120 MS कंचूकं
121 MS आद्र 122 MS पहिया० 123 MS आविन 124 MS ध्वनि.

तस्य विरहस्य नश्यतः[125] सतः धूलिरपि न दृष्टेत्यर्थः ॥ १४६ --

